
# त्रयी चिंतन

## સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

**PART - I**




✦ Publisher ✦

**PRINCIPAL**

**Smt. C. P. Choksi Arts and**
**Shree P. L. Choksi Commerce College.**
**Veraval.**

Scanned with CamScanner

त्रयी चिंतन (TRAYEE CHINTAN)
સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

© **Sampaadak** - Prin. Dr. R. P. Mehta

© **Sahsampaadak** - Dr. A. M. Chocha
- Prof. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

**પ્રાપ્તિ સ્થાન :** Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College, Veraval.

**ISBN No. 978-93-86103-14-7**

**પ્રથમ આવૃત્તિ : ૨૦૧૬**

**કિંમત :** ૩૫૦/—

**Publisher :**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Setting & Printing**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com



Scanned with CamScanner

| | | |
|---|---|---|
| 78 | ॥ शिवसंकल्पसूक्ते मनस्तत्वम् ॥ डॉ. शत्रुघ्नपाणिग्राही आसि.प्रोफेसर, श्री सोमनाथ संस्कृत विश्वविद्यालयः, वेरावलम् | 190 |
| 79 | योगदर्शने मनोविज्ञानम् जानकीशरणदासः श्रीसोमनाथसंस्कृतविश्वविद्यालय, वेरावलम् | 192 |
| 80 | ॥ जातकस्कन्धे मनः स्थितिविचारः ॥ उमा शंकर झा सहायकाचार्यः(ज्योतिषविभागः) श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, | 196 |
| 81 | स्थायी भावों का मनोवैज्ञानिक विश्लेषण प्रो. अर्चना दबे श्रीसोमनाथ संस्कृत युनिवर्सिटी, वेरावल-जिल्ला : गीर सोमनाथ | 198 |
| 82 | ॥ वेदाङ्गज्यौतिषशास्त्रे मनोविज्ञानम् ॥ डॉ. रमेशचन्द्रः बाबूलाल शुक्लः श्री सोमनाथ संस्कृत युनिवर्सिटीसंचालित - संस्कृत कोलेज वेरावलम्, | 200 |
| 83 | आस्तिकर्शनान्तर्गतन्यायदर्शने मनोविज्ञानविचारविमर्शः बी. उमा महेश्वरी असि.प्रो.न्यायर्शनम्, श्री.सो.सं.युनिवर्सिटी, वेरावलम् । | 202 |
| 84 | वेदःभगवद्गीतां उपनिषदे मनस्य आनन्तिक विचाराः वाळा पद्माबने सोमजीभाई विद्यावारीधीः छात्रा श्री सोमनाथ संस्कृत विश्वविद्यालयं वेरावलम् गीर सोमनाथ. | 204 |
| 85 | संस्कृत काव्याः,गद्यकाव्याः मुक्तकाः इत्यादये मनोवैज्ञानिक मावजतः वाळा अनिल सोमजीभाई एम.फील् छात्रः श्री सोमनाथ संस्कृत यृनिवर्सिटी वेरावलम् | 206 |
| 86 | युधिष्ठिरविजयकाव्ये विविधपात्राणां मनोवैज्ञानिकमध्ययनम् C.H.SRAVANTHI अध्यापिका, श्री बी.पी.शेबय्या संस्कृत है स्कूल, पुल्लंपेट, कडप, ए.पी. | 208 |
| 87 | श्रीमद् भगवदगीतायां मनः उर्मि जानी | 210 |
| 88 | **"कुरुक्षेत्र" प्रबन्ध काव्य में युधिष्ठिर की मनःस्थिति** जानी क्रिश्ना सी. श्री महाराजा कृष्णकुमारसिंहजीभावनगर विश्वविद्यालय भावनगर | 214 |
| 89 | "अथर्ववेदमें मनकी संकल्पना" डो. महेन्द्रकुमार अं. दवे श्री सोमनाथ संस्कृत युनिवर्सिटी वेरावलम् | 217 |


📖..........✍

Scanned with CamScanner

# आस्तिकर्शनान्तर्गतन्यायदर्शने मनोविज्ञानविचारविमर्शः

**बी. उमा महेश्वरी**

असि.प्रो.न्यायर्शनम्, श्री.सो.सं.युनिवर्सिटी, वेरावलम्।

**"सुखाद्युपलब्धिसाधनम् इन्द्रयं मनः"**[१]। अर्थात् सुखदुःखादीनां साक्षात्कारः यत्र भवति तत् मनः इति। तत्र न्यायमते मनसः लक्षणं भवति "युगपद्ज्ञानानुपपत्तिर्मनसो लिङ्गम्"[२] इति अर्थात् स्व स्व विषयैः रूपरसादिभिः इन्द्रियाणां संयोगे सत्येव ज्ञानमुत्पद्यते। ततः इन्द्रियैरपि आत्मना सह सत्यपि युगपत् नोत्पद्यतेत्यत्र कारणं वर्तते यत् येन आत्मेन्द्रियविषयानां संयोगे सत्यपि युगपत् ज्ञानानुपपत्तौ यदेव कारणं तदेव मनः। मनस्तु अणु स्वरूपः। अतः युगपदनेकज्ञानानामुत्पत्तौ असहायः। किन्तु येनेन्द्रियेन सह मनसः संयोगो भवति तेन तस्यैकविषयस्यैव ज्ञानं भवति। यदि मनः अणु न स्यात् तर्हि युगपद् ज्ञानानुत्पत्तिः न भवतीत्यर्थः। अण्वेव मन इति मनसः अतीन्द्रियत्वात् अन्यथावक्तुमशक्यत्वादात्मवन्मनसोऽपि लिङ्गं लक्षणमित्युक्तम् घ्राणरसनादे गन्धरसादिज्ञानमपि लक्षणमेव कथ्यते।

तथा आत्मा तावत् व्यापकः व्यापकत्वात् सर्वेन्द्रियैः सम्बद्धो भवति। इन्द्रियाण्यपि स्व स्व प्रेक्षणावसरे स्व स्व अर्थैः सह सम्बद्धानि भवन्ति। तथापि गन्धादीनां युगपद् ज्ञानं नोत्पद्यते, व्यासङ्गदर्शनात्। **"यस्य सन्निधेरसन्निधेश्च ज्ञानस्योत्पत्तिरनुत्पत्तिश्च तन्मनः"**[३] इति तत्र प्रमाणं यथा -आत्मेन्द्रियार्थादयः क्रम।

ततः मनसो लिङ्गम् इत्यसमासाभिधानात् लिङ्गान्तरमपि प्रदर्शयति-**"सुखादयः इन्द्रियपरिच्छेद्याः, प्रत्यक्षसंवेद्यत्वात् रूपादिवत्"**इति बाह्येन्द्रियाणां सामर्थ्यानुपलब्धेः सुखादिपरिच्छेदकं यदिन्द्रियं तन्मन इति मनसः निरुपणं निरूपितम्। तथा च स्मृत्यनुमानागमसंशयादीनां च करणपूर्वकत्वात् मनः सिद्ध्यति, इन्द्रियपूर्वकत्वा£। इति इच्छादीनां क्रियात्वात् करणपूर्वत्वसिद्धौ तत्करणत्वेन परिशेषान्मनः सिद्धम् इति। **मनोवैज्ञानिकसिद्धान्तः** -एते यथा दार्शनिकाः मनः आत्मादीन् अङ्गीकृतवन्तः तथा नाङ्गीकुर्वन्ति। अपि तु, मस्तिष्कमिति एकमिन्द्रियं वर्तते। तच्च मूर्तपदार्थः दृग्गोचरः जीवकणसमुदायः अस्थिकपाले स्थितः पदार्थः मस्तिष्कः इति। तस्मिन् अर्बुदाधिकसंख्याकाःजीवकणाः सन्ति। ते परस्परसहकारेण मानसिककार्यान् कुर्वन्ति इति कथयन्ति। तथा परिवेशेभ्यः आगतोद्दीपनानां ग्रहणं,व्यवस्थापनं, अर्थकल्पनं, पूर्वानुभवैस्साकं मेलनं, प्रकृतविद्यमानपरिस्थित्यनुगुणं कथं व्यवहारः कर्तव्यमिति निर्देशनम् एतत्सर्वं मस्तिष्कस्य कार्यमिति च प्रतिपादयन्ति।

तत्र आद्यमिन्द्रियजं ज्ञानमेव संवेदनपदवच्यं भवति। तादृशी सवेदनजनकानि पञ्च ज्ञानेन्द्रियाणी सन्तीति संवेदनसंख्यापि पञ्चविधा भवति। तत्र संवेदनाविभागः कथं कृतः इतिचेत् विषयसम्बन्धात् कृत इति। एवमेव मनोविज्ञानेऽपि इन्द्रियसम्बन्धाश्रितः संवेदनिवभागः द्रष्टुं शक्यते। तत्र पञ्चज्ञानेन्द्रियैः संवेदनं यथा-

(१) दृष्टिसंवेदनम्।

(२) श्रोत्रसंवेदनम्।

(३) घ्राणसंवेदनम्।

(४) रससंवेदनम।

(५) स्पर्शसंवेदनम्।

तत्रभारतीयदर्शन ग्रन्थेषु पञ्चज्ञानेन्द्रियविषया प्रोक्ताः। तर्हि तेषां संवेदनं यथा (१) रूपसंवेदनम्, (२) रससंवेदनम्, (३) गन्धसंवेदनम्, (४) शब्दसंवेदनम्,(५) स्पर्शसंवेदनम् चेति विभागः। एवं प्रकारेण विषयानां प्रत्यक्षादि ज्ञानं भवतीति। तत्र नैयायिकैः प्रोक्त निर्विकल्पकल्पज्ञानमेव मनोवैज्ञानिकै संवेदना नाम्ना व्यवहृतम्।



Scanned with CamScanner

संवेदना-प्रत्यक्षं,ऊहा, तुलनं,न्यायनिर्णयः, कल्पनं ,संवेगानुभूतिः, इत्यादिकल्पनानां सर्वेषामपि एतदेव कारणं भवति। मस्तिष्कं नामकमिन्द्रियं मूर्तद्रव्यम् वर्तते । तेन मस्तिष्केन क्रियमानानि कार्याणि मनः इति नाम्नैव व्यवह्रियन्ते । विषयश्च सूक्ष्मदृष्ट्या ज्ञातव्यं भवति। मस्तिष्केन क्रियमानं सर्वमपि कार्यं मन इति नाम्ना व्यवह्रियते[४] इति।

तत्र यत्किमपि वस्तुनः प्रत्यक्षज्ञानं कथं भवतीत्यत्र नैयायिकाः, **"आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षमि"** ति क्रमं प्रितपादयन्ति । अर्थात् आत्ममनस्संयोगः मन इन्द्रियसंयोगः इन्द्रियार्थसंयोगश्च प्रत्यक्षज्ञानजनने कारणानीति । तत्र नव्यनैयायिकाः कथयन्ति,चाक्षुषप्रत्यक्षे रूपं कारणम्, स्पार्शनप्रत्यक्षे स्पर्शः कारणं, अत एव वायोरपि प्रत्यक्षत्वं सम्भवति इति । किन्तु तत्र प्राचीनाः वायोः प्रत्यक्षत्वं नाङ्गीकुर्वन्ति अपि तु अनुमानमेव अतः प्रत्यक्षसामान्ये उद्भूतरूपस्य कारणत्वं वक्तव्यमिति तेषामाशयः ।

यद्यपि मन अपि इन्द्रियमेव खलु? तर्हि कुतः तस्य उद्देशः पृथक्प्रस्थावित इति जिज्ञासासमाधानाय भासर्वज्ञेन समाधानस्वं प्रदत्तम् । तत्र एकं मन अन्येन्द्रियैरिव बाह्येन्द्रियं नास्ति । अपि तु पृथक् द्रव्यं वर्तते । तथा सर्वेन्द्रियाणां प्रवृत्तिकारकं मनः वर्तते इति । यदि मनसः जयः भवति तर्हि सर्वेन्द्रियाणां विजयो भवति । अतः मुमुक्षवः निरन्तरं मनोजयार्थं प्रयत्नं कुर्वन्ति ।इदमेव वैलक्षण्यं वर्तते मनसः पृथक् लेखनस्य । मनसः महत्त्वं प्राचीनदार्शनिकैः प्रदर्शितं यथा-

(१) तन्मे मनः शिवसङ्कल्पमस्तु[५]।

(२) मन एव मनुष्याणां कारणं बन्धमोक्षयोः[६]।

(३) असंशयं महाबाहो मनो दुर्निग्रहं चलम्।

(४) मनः षष्ठानीन्द्रियाणि ।

(५) विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः । सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम्[९]।।

## सन्दर्भग्रन्थसूची


१. न्यायभाष्यम्
वात्स्यायनभाष्यसहितम्, सुदर्शनाचार्यकृतप्रसन्नपदाव्याख्योपेता, सं०द्वारिकादासशास्त्री, सुधीप्रकाशनम्, वाराणसी,१९८६ ई० ।

२. न्यायभूषणम् स्वामीयोगीन्द्रानन्दः,चौखम्बा विद्याभवनम् वाराणसी, २००४ ।

३. न्यायमनोविज्ञाननयेन प्रत्यक्षविमर्शः, डा०रामचन्द्रुल बालाजी, राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपतिः,२०११

४. यजुर्वेदः,शिवसङ्कल्पसूत्रम्,चौखम्बा विद्याभवन्, वाराणसी ।

५. मैत्रयण्युपनिषत्,गीताप्रेस्-गोरखपुर् ।

६. श्रीमद्भगवद्गीता, शाङ्करानन्दी व्याख्योपेता, अच्युत ग्रन्थमाला,वाराणसी,२०२३वि०सं० ।

७. कठोपनिषद्, सानुवादं शाङ्करभाष्यसहितम्, प्रकाशकः-गोविन्दभवनकार्यालयः,गीताप्रेस-गोरखपुर्

८. तर्कसङ्ग्रहः,नटटीकोपेतः,चौखम्बा संस्कृत संस्थान,वाराणसी१९७६ ई० ।




Scanned with CamScanner